# ॥ श्रीगोकुलाष्टकम् अथवा गोकुलनामस्तोत्रम् ॥

.. shrIgokulAShTakam ..

sanskritdocuments.org

August 20, 2017

# .. shrIgokulAShTakam ..

# ॥ श्रीगोकुलाष्टकम् अथवा गोकुलनामस्तोत्रम् ॥

## Sanskrit Document Information

Text title : gokulAShTakam

File name : gokulAShTakam.itx

Category : aShTaka, vishhnu, krishna

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ श्रीगोकुलाष्टकम् अथवा गोकुलनामस्तोत्रम् ॥

श्रीमद्गोकुलसर्वस्वं श्रीमद्गोकुलमण्डनम् ।
श्रीमद्गोकुलदृक्तारा श्रीमद्गोकुलजीवनम् ॥ १॥

श्रीमद्गोकुलमात्रेशः श्रीमद्गोकुलपालक ।
धीमद्गोकुललीलाब्धिः त्रीमद्गोकुलसंश्रयः मे २॥

श्रीमद्गोकुलजीवात्मा श्रीमद्गोकुलमानसम् ।
श्रीमद्गोकुलदुःखघ्नः श्रीमद्गोकुलवीक्षितः ॥ ३॥

थ श्रीमद्गोकुलसौन्दर्यं श्रीमद्गोकुलसत्फलम् ।
श्रीमद्गोकुलगोप्राणः श्रीमद्गोकुलकामहः ॥ ४॥

श्रीमद्गोकुलराकेशः श्रीमद्गोकुलतारकः ।
श्रीमद्गोकुलपद्मालिः श्रीमद्गोकुलसंस्तुतः ॥ ५॥

श्रीमद्गोकुलसङ्गीतः श्रीमद्गोकुललास्यकृत् ।
श्रीमद्गोकुलभावात्मा श्रीमद्गोकुलपालकः ॥ ६॥

श्रीमद्गोकुलहृत्स्थानः श्रीमद्गोकुलसंवृतः ।
श्रीमद्गोकुलदृक्पुष्टः श्रीमद्गोकुलमोदितः ॥ ७॥

श्रीमद्गोकुलभोग्यश्रीः श्रीमद्गोकुललालितः ।
श्रीमद्गोकुलभाग्यश्रीः श्रीमद्गोकुलसर्वकृत् ॥ ८॥

इमानि श्रीगोकुलेशनामानि वदने मम ।
वसन्तु सततं चैव लीलाश्च हृदये सदा ॥ ९॥

इति श्रीविठ्ठलेश्वरविरचितं गोकुलाष्टकं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com



Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*